# Sanghavatadibhih Kritam Hari Stotram

# सङ्घवाटादिभिः कृतं हरिस्तोत्रम्

## Document Information

Text title : Sanghavatadibhih Kritam Hari Stotram

File name : sanghavATAdibhiHkRRitaMharistotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 70/80-96||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# सङ्घवाटादिभिः कृतं हरिस्तोत्रम्

द्रुतं ते मूषकदेहाँस्त्यक्त्वा वै मण्डपान्तरे ॥ ८० ॥

सुदिव्या देववज्जाता देवा देव्यश्च शोभनाः ।
सर्वे षोडशवर्षाश्च भासमानाः प्रभाविणः ॥ ८१ ॥

तुष्टुवुः परमात्मानं संहितास्थं हरिं प्रभुम् ।
“नमो मोक्षप्रदानां तु सतां लक्ष्यैकबिन्दवे ॥ ८२ ॥

मुक्तानां ध्यानलक्ष्याय सर्वावतारिणे नमः ।
नमः कृष्णाय कृष्णादिस्वामिने परमात्मने ॥ ८३ ॥

बालकृष्णाय कान्ताय सर्वकान्ताय रक्षिणे ।
श्रीशाय कमलेशाय राधेशाय विहारिणे ॥ ८४ ॥

नमो देवाधिवासाय सर्वान्तर्यामिणे नमः ।
नमोऽनादिनिधनाय मोक्षदात्रे कृपालवे ॥ ८४१ ॥

नमः श्रीलोमशायाऽपि सद्भ्यश्चापि नमो नमः ।
नमो व्यासाय दिव्याय स्वयम्प्रकाशिने नमः ॥ ८६ ॥

नमः पद्मावतीलक्ष्मीप्रज्ञाभूपतये नमः ।
नमस्तस्मै हृदिस्थाय धामस्थाय च ते नमः ॥ ८७ ॥

प्रसादाय नमश्चापि मण्डपाय च वै नमः ।
नमो मण्डपदेवेभ्यो नमः श्रवणिभ्यस्तथा ॥ ८८ ॥

तारकेभ्यः पावकेभ्यः सद्भ्यः सदा नमो नमः ।
साध्वीभ्यश्च सतीभ्यश्च वैष्णवेभ्यो नमो नमः” ॥ ८९ ॥

वयं पापाः प्रसादेनोद्धृता यदृच्छया त्विह ।
कृपया दिव्यतां प्राप्ताः सतां दर्शनतस्तथा ॥ ९० ॥

जातिस्मराः स्म सञ्जाताः कथास्थानप्रभावतः ।

पुनर्जन्म न चेच्छामश्चेच्छामः शाश्वताऽक्षरम् ॥ ९१॥

स्वप्रकाशो हि भगवान् ददातु मन्त्रमुत्तमम् ।
नामधुन्यं प्रददातु येन यास्याम उत्तमम् ॥ ९२॥

अक्षरं परमं धाम परमेश्वरराजितम् ।
इत्येवं बद्रिके ते सम्प्रार्थयामासुरुत्सुकाः ॥ ९३॥

स्वप्रकाशो हि भगवान् ददौ तेभ्यो मनुं तदा ।
"ॐ नमः श्रीकृष्णनारायणाय पतये स्वाहा" ॥ ९४॥

प्रभो नारायण पद्मावतीनारायण प्रभो ।
जयाकृष्ण ललिताश्रीकृष्ण राधापते विभो" ॥ ९५॥

धुन्यं ददौ तदा तेभ्यस्तेऽपि चक्रुः प्रकीर्तनम् ।
एकताना अभवँश्च श्रीकृष्णे वल्लभे प्रभौ ॥ ९६॥

इति श्रीलक्ष्मीनारायणीयसंहितायाः तिष्यसन्तानात्मकस्य चतुर्थखण्डे ७०-अध्यायान्तर्गतं मूषकजन्मान्मुक्तैः सङ्घवाटादिभिः कृतं हरिस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड ४। अध्याय ७०/८०-९६॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 70/80-96..

Proofread by PSA Easwaran

*Sanghavatadibhih Kritam Hari Stotram*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*